# आदर्शप्रश्नपत्रम् – 2020-21

## कक्षा – XII

## संस्कृतम् (ऐच्छिकम्) कोड सं – 022)

## Sanskrit Elective (022)

**समयः – होरात्रयम्** **पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः –**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 15 प्रमुखाः प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् -**

**'अ' - भागः (बहुविकल्पात्मकः)** - 40 **अङ्काः**

**'आ' - भागः (वर्णनात्मकः)** - 40 **अङ्काः**

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ'- भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ'- भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

(v) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया।

(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## 'अ' भागः

## (बहुविकल्पात्मकाः प्रश्नाः) 40 अङ्काः

## पठितावबोधनम्

| | | |
|---|---|---|
| 1. | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य समुचितं प्रश्नवाचकं पदं प्रदत्तविकल्पेभ्यः चिनुत– (केवलं प्रश्नषट्कम्)<br>(i) कौत्सः <u>**वरतन्तोः**</u> शिष्यः।<br>(क) कस्य (ख) कयोः (ग) कौ<br>(ii) योगः <u>**स्वास्थ्यकरः**</u>।<br>(क) किम् (ख) कः (ग) कीदृशः<br>(iii) मरालस्य <u>**मानसं**</u> मानसं विना न रमते।<br>(क) काम् (ख) किम् (ग) कम्<br>(iv) <u>**पुत्तलिका**</u> राजानम् अवदत्।<br>(क) किम् (ख) का (ग) कया<br>(v) किं वस्तु विद्वन्! <u>**गुरवे**</u> प्रदेयम्।<br>(क) कस्मिन् (ख) केभ्यः (ग) कस्मै<br>(vi) तस्य <u>**राज्येन**</u> सह कश्चित् सम्पर्कः नास्ति।<br>(क) केन (ख) कान् (ग) कस्मात्<br>(vii) शिववीरचरः <u>**निजकार्यात्**</u> न विरमति।<br>(क) कस्मै (ख) कस्मात् (ग) कस्मिन्<br>(viii) एकैकस्य शब्दस्य बहवः <u>**अपभ्रंशाः**</u> सन्ति।<br>(क) के (ख) काः (ग) कस्याः | 1×6=6 |
| | | |
| 2. | यथानिर्देशम् उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नपञ्चकम्)<br>(i) '**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः**' अत्र '**कुरु**' इति क्रियापदस्य कर्तृपदं किम्?<br>(क) नियतं (ख) कर्म (ग) त्वम्<br>(ii) '**स विक्रमो राजा एकदा स्वमनस्यचिन्तयत्**' अत्र '**विक्रमः**' इति कर्तृपदस्य क्रियापदं किम्?<br>(क) अचिन्तयत् (ख) एकदा (ग) स्वमनसि<br>(iii) '**शास्त्रजलप्रक्षालन-निर्मलापि कालुष्यमुपयाति बुद्धिः**' अस्मिन् वाक्ये विशेष्यपदं किम्?<br>(क) निर्मला (ख) कालुष्यम् (ग) बुद्धिः | 1×5=5 |

| | | | |
|---|---|---|---|
| | (iv) **'अहो! सन्दीपनान्यक्षराणि'** अत्र विशेषणपदं किम्?<br>(क) अक्षराणि (ख) सन्दीपनानि (ग) अहो<br>(v) **'एकः सायं समयप्रयुक्तः स्वभाववृत्तोऽन्धकारः स च द्विगुणितो मेघमालाभिः'** अत्र **'सः'** इति सर्वनामपदं कस्मै प्रयुक्तम् ?<br>(क) अन्धकाराय (ख) स्वभाववृत्ताय (ग) द्विगुणिताय<br>(vi) **'अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः'** इति वाक्यं कस्मात् ग्रन्थात् गृहीतम्?<br>(क) शिवराजविजयः (ख) कादम्बरी (ग) रघुवंशम्<br>(vii) **'नूनमाश्वमेधिकोऽयमश्वः'** इति वचनं कः कथयति ?<br>(क) लवः (ख) जनकः (ग) शिववीरचरः | |
| | | | |
| 3. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं समुचितम् अर्थं विकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम्)**<br>(i) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं <u>**समाः**</u>।<br>(क) समानाः (ख) वर्षाणि (ग) कामनाः<br>(ii) एष <u>**रोहितानां**</u> मध्येचरो भवतु।<br>(क) मत्स्यानाम् (ख) अङ्कुराणाम् (ग) मृगाणाम्<br>(iii) पुरुषः कर्मणाम् अनारम्भात् नैष्कर्म्यं न <u>**अश्नुते**</u>।<br>(क) प्राप्नोति (ख) खादति (ग) श्रृणोति<br>(iv) तटाकोदर<u>**संस्थानां**</u> परीवाह इवाम्भसाम्।<br>(क) विद्यालयानाम् (ख) स्थितानाम् (ग) प्रतिष्ठानानाम्<br>(v) कलविङ्काः <u>**चाटकैर**</u>–रुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते।<br>(क) चटकसन्ततिः (ख) चटकः (ग) चाटुकारः<br>(vi) <u>**श्वापदानां**</u> हिंसाकर्म किल जठरानलनिर्वाणमात्रप्रयोजकम्।<br>(क) श्वानानाम् (ख) अश्वानाम् (ग) वन्यपशूनाम्<br>(vii) स्वविषयसम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां <u>**प्रत्याहारः**</u>।<br>(क) भोजनम् (ख) इन्द्रियदमनम् (ग) स्वीकरणम्<br>(viii) कथं तर्हीमे शब्दाः <u>**प्रतिपत्तव्याः**</u>?<br>(क) ज्ञातव्याः (ख) पठितव्याः (ग) प्रकटितव्याः | 1×6=6 |
| | | | |
| 4. | **अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत – (केवलम् अष्ट प्रश्नाः)**<br>(i) 'बुद्धचरितम्' इति काव्यं कः अरचयत्? | 1×8=8 |

| | | |
|---|---|---|
| | (क) माघः (ख) अश्वघोषः (ग) कालिदासः | |
| | (ii) 'रघुवंशम्' इति काव्यस्य रचयिता कः? | |
| | (क) कालिदासः (ख) भारविः (ग) अश्वघोषः | |
| | (iii) गीतायाम् कति अध्यायाः सन्ति? | |
| | (क) षोडश (ख) चतुर्दश (ग) अष्टादश | |
| | (iv) 'गीतगोविन्दस्य' रचनाकारः कः अस्ति? | |
| | (क) माघः (ख) भर्तृहरिः (ग) जयदेवः | |
| | (v) 'महावीरचरितम्' कः अरचयत्? | |
| | (क) श्रीहर्षः (ख) भासः (ग) भारविः | |
| | (vi) 'शिशुपालवधम्' कस्य रचना अस्ति? | |
| | (क) माघस्य (ख) बाणभट्टस्य (ग) भर्तृहरेः | |
| | (vii) रामायणे कति काण्डानि सन्ति? | |
| | (क) अष्ट (ख) सप्त (ग) षट् | |
| | (viii) 'महाभारतस्य' रचयिता कः? | |
| | (क) वाल्मीकिः (ख) कालिदासः (ग) व्यासः | |
| | (ix) श्रीहर्षः कं काव्यं रचितवान्? | |
| | (क) नैषधीयचरितम् (ख) मेघदूतम् (ग) किरातार्जुनीयम् | |
| | (x) 'विक्रमाङ्कदेवचरितम्'कस्य रचना अस्ति? | |
| | (क) कल्हणस्य (ख) बिल्हणस्य (ग) जयदेवस्य | |
| | (xi) कालिदासः कं नाटकम् अरचयत्? | |
| | (क) उत्तररामचरितम् (ख) मध्यमव्यायोगः (ग) विक्रमोर्वशीयम् | |
| | **छन्दोऽलङ्कारपरिचयः** | |
| 5. | (अ) अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत - (केवलं प्रश्नद्वयम्) | 1×2=2 |
| | (i) जगणस्य रूपं किम्? | |
| | (क) ऽऽ। (ख) ऽऽऽ (ग) ।ऽ। | |
| | (ii) 'हविषा' इत्यत्र को गणः? | |
| | (क) रगण (ख) सगण (ग) भगण | |
| | (iii) यगणस्य किं स्वरूपम्? | |
| | (क) ।ऽऽ (ख) ।।। (ग) ऽ।। | |
| | (आ) अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत –(केवलं प्रश्नत्रयम्) | 1×3=3 |
| | (i) 'सूर्याश्वैर्यदि मासजौसततगाः... ' अस्याः परिभाषायाः अवशिष्टांशं किम्? | |
| | (क) मालिनी भोगिलोकैः (ख)शार्दूलविक्रीडितम् (ग) शिखरिणी | |

| | | |
|---|---|---|
| | (ii) '........ तभजाजगौगः' परिभाषायाः पूर्वार्द्धं किम् ?<br>(क) उक्ता वसन्ततिलका (ख)मन्दाक्रान्ताम्बुधि (ग) स्यादिन्द्रवज्रा<br>(iii) 'अनुष्टुप्' छन्दसः उदाहरणं किम्?<br>(क) तमर्चयित्वा विधिवद् विधिज्ञः तपोधनं मानधनाग्रयायी<br>(ख) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन<br>(ग) उत्साहसम्पन्नमदीर्घसूत्रम् क्रियाविधिज्ञं व्यसनेष्वसक्तम्<br>(iv) 'उपजाति' छन्दसः उदाहरणं चिनुत।<br>(क) अस्त्युत्तरस्यां दिशि देवतात्मा<br>(ख) पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्<br>(ग) भवन्ति नम्रास्तरवः फलोद्गमैः | |
| | (इ) अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत -(केवलम् प्रश्नत्रयम्)<br>(i) 'सति च कुलविरोधे नापराधयन्ति बालाः'अस्यां पङ्क्तौ किं छन्दः?<br>(क) अनुष्टुप् (ख) मालिनी (ग) वसन्ततिलका<br>(ii) 'स्वभाव एवैष परोपकारिणाम्' अत्र किं छन्दः प्रयुक्तम्?<br>(क) शिखरिणी (ख) वंशस्थम् (ग) मन्दाक्रान्ता<br>(iii) 'सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ' अत्र किं छन्दः?<br>(क) अनुष्टुप् (ख) उपजातिः (ग) इन्द्रवज्रा<br>(iv) 'पापान्निवारयति योजयते हिताय'अस्यां पङ्क्तौ किं छन्दः?<br>(क) मन्दाक्रान्ता (ख) शार्दूलविक्रीडितम् (ग) वसन्ततिलका | 1×3=3 |
| | | |
| 6. | (अ) अधोलिखितप्रश्नानानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नद्वयम्)<br>(i) 'सत्यर्थे पृथगर्थायाःस्वरव्यञ्जनसंहतेः।' इदं कस्यालङ्कारस्य लक्षणम् ?<br>(क) अनुप्रासस्य (ख) यमकस्य (ग) श्लेषस्य<br>(ii) 'स्वस्त्यस्तु ते निर्गलिताम्बुगर्भम्' अस्यां पङ्क्तौ कः अलङ्कारः?<br>(क) रूपकम् (ख) श्लेषः (ग) अनुप्रासः<br>(iii) अनुप्रासस्य लक्षणं किम्?<br>(क) वर्णसाम्यमनुप्रासः<br>(ख) भवेत् सम्भावनोत्प्रेक्षा<br>(ग) साधर्म्यमुपमा भेदे | 1×2=2 |
| | (आ) प्रदत्तविकल्पेभ्यः प्रश्नानानाम् उत्तराणि चिनुत – (केवलं प्रश्नत्रयम्)<br>(i) काव्ये यदा उपमेये उपमानस्य आरोपः भवति तदा कः अलङ्कारः कथ्यते?<br>(क) उत्प्रेक्षा (ख) उपमा (ग) रूपकम् | 1×3=3 |

| | | |
|---|---|---|
| | (ii) 'श्लिष्टैः पदैरनेकार्थाभिधाने...' इति कस्यालङ्कारस्य लक्षणम्?<br>(क) अर्थान्तरन्यासस्य (ख) श्लेषस्य (ग) उपमायाः<br>(iii) केन अलङ्कारेण भेदयोः अपि समानता प्रतिपाद्यते ?<br>(क) उपमया (ख) उत्प्रेक्षया (ग) यमकेन<br>(iv) 'भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति कस्य अलङ्कारस्य लक्षणम् ?<br>(क) रूपकस्य (ख) अनुप्रासस्य (ग) उत्प्रेक्षायाः<br>**(इ) अधोलिखितवाक्येषु प्रयुक्तम् अलङ्कारं प्रदत्तविकल्पेभ्यः चिनुत - (केवलं प्रश्नद्वयम्)**<br>(i) आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः।<br>(क) उत्प्रेक्षा (ख) उपमा (ग) श्लेषः<br>(ii) रमते न मरालस्य मानसं मानसं विना ।<br>(क) यमकः (ख) अनुप्रासः (ग) रूपकम्<br>(iii) निपुणं निरुप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव।<br>(क) उपमा (ख) अर्थान्तरन्यासः (ग) रूपकम् | 1×2=2 |

## 'आ' – भागः

## (वर्णनात्मकप्रश्नाः) 40 अङ्काः

## अपठितावबोधनम्

| | | |
|---|---|---|
| 7. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत –**<br>एकदा सर्वे पक्षिणः मिलित्वा उलूकं स्वाधिपतिं विधातुं विचारितवन्तः तस्य अभिषेकबेलापि तैः निश्चिता। ततो यदा अभिषेकोत्सवः प्रारब्धः तदैव कश्चित् वायसः तत्रागच्छत्। उलूकस्याभिषेक-समाचारं श्रुत्वा सोऽवदत् भोः! किं विचार्य भवता एषः दिवान्धः राजपदे प्रतिष्ठापयितुं निश्चितः। यस्य देशस्य राजा एव अन्धो भविष्यति तस्य प्रजा अपि तथैव भविष्यति। किं न श्रुतं भवद्भिः 'यथा राजा तथा प्रजा' ततः सर्वेऽपि तस्य परामर्शं मत्वा यत्र तत्र प्रस्थिताः। कथैषा पुराणी परम् अद्यापि अक्षरशः सत्यम्। लोकतान्त्रिकेषु देशेषु यथा राष्ट्रप्रमुखः सर्वकारो वा तथैव तस्य देशस्य स्थितिः भवति। अतःराजपदे शिक्षितः योग्यजनः एव प्रतिष्ठापयितव्यः। सम्प्रति यथा नेतारः तथा संसारः। | 10 |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) पक्षिणः कं स्वाधिपतिं विधातुम् उद्यताः?<br>(ii) यदा अभिषेकोत्सवः प्रारब्धः तदा कः तत्रागच्छत्?<br>(iii) सर्वेऽपि किं मत्वा यत्र तत्र प्रस्थिताः? | 1×2=2 |

| | | |
|---|---|---|
| | (आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) वायसः तत्र आगत्य किम् अवदत्?<br>(ii) सर्वे पक्षिणः किं विचारितवन्तः?<br>(iii) सम्प्रति कथं संसारः?<br>(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।<br>(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)<br>(i) काकः इति पदस्य पर्यायं गद्यांशात् चित्वा लिखत ।<br>(ii) 'अन्धः'इति विशेषणपदस्य विशेष्यपदं किम्?<br>(iii) 'यथा' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत ।<br>(iii) 'तस्य अभिषेक-बेलापि तैः निश्चिता' अत्र 'तस्य' इति सर्वनाम कस्मै प्रयुक्तम्? | 2×2=4<br><br>1×1=1<br>1×3=3 |
| | **रचनात्मककार्यम्** | |
| 8. | अधोलिखित-पदेषु कानिचित् पञ्चपदानि आधृत्य पञ्चवाक्यानि संस्कृतेन लिखत –<br>ऋतुराजः, षट्, भवति, नृत्यन्ति, प्रमोदः, पूर्णिमायां, नराः, उत्सवौ, प्रसन्नाः | 1×5=5 |
| | | |
| 9. | प्रदत्ततथ्यानां सहातया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत -<br>**विषयः – पर्यावरण-संरक्षणम्।**<br>पर्यावरणस्य प्रस्तावना अभिप्रायश्च<br>पर्यावरण-प्रदूषकाः के ?<br>प्रदूषकाणां निवारणोपायाः<br>उपसंहारः<br>**अथवा**<br>**विषयः – विद्याविहीनः पशुः ।**<br>प्रस्तावना<br>विद्यायाः लाभाः<br>विद्यायाःमहत्त्वम् उपयोगित्वं च<br>विद्याप्राप्तेः उपायाः<br>उपसंहारः | 5 |
| | | |
| 10. | निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत –<br>1. अरविन्द पत्र लिखता है ।<br>Arvind writes letter. | 1×5=5 |

| | | |
|---|---|---|
| | 2. वह कक्षा में प्रथम स्थान प्राप्त करेगा।<br>He will be securing first position in the class.<br>3. गांव के दोनों ओर वृक्ष हैं।<br>There are trees on both the sides of the village.<br>4. मेरे घर संगीत का कार्यक्रम हुआ था।<br>There was a music program at my place.<br>5. गंगा हिमालय से प्रकट होती है।<br>Ganga originates from Himalayas.<br>6. कवियों मे कालिदास श्रेष्ठ हैं।<br>Kalidas is best of all the poets.<br>7. हम सब चलचित्र का आनन्द प्राप्त करेंगे।<br>We will enjoy the movie. | |
| | **पठितावबोधनम्** | |
| 11. | **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>मनुष्याणां हिंसावृत्तिस्तु निरवधिः। पशुहत्या तु तेषाम् आक्रीडनम्। केवलं क्लान्तचित्तविनोदाय महारण्यम् उपगम्य ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति। तेषां पशुप्रहार-व्यापारमालोक्य जडानामपि अस्माकं हृदयं विदीर्यते।निरन्तरम् आत्मोन्नतये चेष्टमानाः लोभाक्रान्त–हृदयाः मनुजन्मानः किल प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते। न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति। परं तृणवद् उपेक्षन्ते स्नेहम्।अहितमिव परित्यजन्ति आर्जवम्।<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) मनुष्याणां हिंसावृत्तिः कीदृशी?<br>(ii) पशुहत्या केषाम् आक्रीडनम्?<br>(iii) लोभाक्रान्तहृदयाः अहितमिव किं परित्यजन्ति?<br>(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम् )<br>(i) केवलं चित्तविनोदाय ते किं कुर्वन्ति?<br>(ii) अस्माकं हृदयं किमर्थं विदीर्यते?<br>(iii) लुब्धाः मानवाः किमर्थं सर्वात्मना प्रवर्तन्ते? | 3<br><br>½×2=1<br><br>1×2=2 |
| | | |
| 12. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।**<br>**समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद् गुरुदक्षिणायै।**<br>**स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत् पुरस्तात् ।।** | 3 |

| | | |
|---|---|---|
| | (अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कौत्सेन कः विज्ञापितः अभवत् ?<br>(ii) महर्षिः कीदृशीं भक्तिम् अचिनोत् ?<br>(iii) विद्या केन समाप्ता ?<br>(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) कौत्सेन महर्षिः किमर्थं निवेदितः?<br>(ii) महर्षिः सर्वप्रथमं काम् अगणयत् ?<br>(iii) कीदृशः कौत्सः महर्षिं न्यवेदयत्? | ½×2=1<br><br><br><br>1×2=2 |
| | | |
| 13. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।<br>लवः – हे बटवः! परिवृत्य लोष्ठैरभिघ्नन्त उपनयतैनमश्वम्। एष रोहितानां मध्येचरो भवतु। (प्रविश्य सक्रोधः)<br>पुरुषः – धिक् चपल! किमुक्तवानसि ? तीक्ष्णतराह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते। राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोऽप्यपूर्वारण्यदर्शनाक्षिप्त-हृदयो न यावदायाति, तावत् त्वरितमनेन तरुगहनेनापसर्पत।<br>बटवः –कुमार ! कृतं कृतमश्वेन । तर्जयन्ति विस्फारितशरासनाः कुमारमायुधश्रेणयः। दूरे चाश्रमपदम्। इतस्तदेहि। हरिणप्लुतैः पलायामहे।<br>लवः – किं नाम विस्फुरन्ति शस्त्राणि ?(इति धनुरारोपयति)<br>(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)<br>(i) अश्वः केषां मध्येचरो भवतु ?<br>(ii) कः दुर्दान्तः ?<br>(iii) कः धनुरारोपयति ?<br>(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् )<br>(i) बटवः कथम् अश्वमुपनयेत ?<br>(ii) तीक्ष्णतराः आयुधश्रेणयः किं न सहन्ते ?<br>(iii) विस्फारितशरासनाः आयुधश्रेणयःकं तर्जयन्ति ? | 3<br><br><br><br><br><br><br><br><br>½×2=1<br><br><br><br>1×2=2 |
| | | |
| 14. | अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत –<br>**बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।**<br>**तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥**<br>**भावार्थः** – अस्मिन् संसारे बुद्धिमन्तःजनाःसुकृतं च (i)……………..…….. च उभे त्यजन्ति। तस्मात् (ii)…………………..…. प्रयत्नः कर्तव्यः। | 1×3=3 |

| | | | |
|---|---|---|---|
| | योगः कर्मसु (iii) ……………………भवति।<br><br>**अथवा**<br><br>**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**<br>**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।**<br>**भावार्थः** –अस्मिन् लोके शास्त्रविहितानि (i)…..…………………. कुर्वन्नेव शतं (ii) ……………. यावत् जीवितुमिच्छेत्। अस्मात् पृथक् अन्यः कश्चन मार्गः नास्ति। इत्थं प्रकारेण जीवनं जीवति त्वयि (iii) ……….…… कर्म न लिप्यते।<br><br>**मञ्जूषा–**<br><br>नरे, कर्माणि, वर्षाणि, कौशलम्, दुष्कृतम्, योगाय | |
| | | | |
| 15. | **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत - (केवलं पद्यमेकम्)**<br>**तमध्वरे विश्वजिति क्षितीशं**<br>**निःशेषविश्राणितकोषजातम् ।**<br>**उपात्तविद्यो गुरुदक्षिणार्थी**<br>**कौत्सः प्रपेदे वरतन्तुशिष्यः॥**<br>**अन्वयः** – उपात्तविद्यः वरतन्तुशिष्यः (i)… ………………. कौत्सः विश्वजिति (ii) .............. निःशेषविश्राणितकोषजातं तं (iii) ………… प्रपेदे।<br><br>**अथवा**<br><br>**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**<br>**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥**<br>**अन्वयः** – श्रेष्ठः यत् यत् (i) ................... इतरः (ii) ................. तत् तत् एव (करोति)। सः यत्प्रमाणं कुरुते (iii) ...................... तत् अनुवर्तते। | 1×3=3 |

******************************